# Mayaramabhattakrita Shri Hari Stuti

# मयारामभट्टकृता श्रीहरिस्तुतिः

## Document Information

Text title : Mayaramabhattakrita Shri Hari Stuti

File name : mayArAmabhaTTakRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Author : mayArAmabhaTTa

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# मयारामभट्टकृता श्रीहरिस्तुतिः

(वसन्ततिलकम्)
तेजोमये परमधामनि राजमानः
कन्दर्पकोटिकमनीयसुभद्ररूपः ।
यो नैजमुक्तगणसेवितपादपद्मस्त्वां
धर्मनन्दनमहं प्रणमामि नित्यम् ॥ १॥

जेगीयमानचरितं श्रुतिशास्त्रवारैः
सर्वेश्वरं च परिपूर्णविबोधमाद्यम् ।
ब्रह्माण्डकोटिमनिशं परिपालयन्तं
त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ २॥

नैकात्ममुक्तिमनुचिन्तयमानमीशं
नैजेच्छया क्षितितले धृतमर्त्यनाट्यम् ।
भक्त्यात्मजं परमवल्लभवर्णिवेषं
त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ ३॥

मुक्तिप्रदं सकलमङ्गलमङ्गलञ्च
योगीन्द्रचित्तविनिवासपदं परेशम् ।
संसारघोरदुरितार्तिहरं महेशं
त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ ४॥

ध्यानं यदीयममलं तनुते प्रकाशं
यद्दर्शनं जनयते परमं प्रभावम् ।
यत्कीर्तनं कलयते चरमाम्प्रशान्तिं
त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ ५॥

भूतं ददाति सततं वचनामृतैर्यः
शिक्षां प्रदाय नियमैर्वितनोति धर्मम् ।
लोकोत्तरस्वचरितैः शमयत्यभद्रं

त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ ६॥

तोष्यमानगुणराशिममर्त्यवृन्दैः
सर्वात्मकं निखिलकारणकारणञ्च ।
श्रीधीधृतिप्रगतिनीतिचितिप्रकाशं
त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ ७॥

यन्नाम वर्तत इदा कलिकल्मषघ्नं
नैराश्यकर्दमनिमग्नप्रतारकञ्च ।
कल्पद्रुमोपममघौघहरप्रभावं
त्वां धर्मनन्दनमहं प्रणमामि नित्यम् ॥ ८॥

इति श्रीस्वामिनारायणबापाचरित्रामृतसागरे तृतीयप्रवाहे
द्विचत्वारिंशत्तमे तरङ्गे मयारामभट्टकृता श्रीहरिस्तुतिः सम्पूर्णा ।

*Mayaramabhattakrita Shri Hari Stuti*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*